योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०२३

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२ सर्गः ११६

सर्गः ५३ सर्गः ११७

सर्गः ५४ सर्गः ११८

सर्गः ५५ सर्गः ११९

सर्गः ५६ सर्गः १२०

सर्गः ५७ सर्गः १२१

सर्गः ५८ सर्गः १२२

सर्गः ५९ सर्गः १२३

सर्गः ६० सर्गः १२४

सर्गः ६१ सर्गः १२५

सर्गः ६२ सर्गः १२६

सर्गः ६३ सर्गः १२७

सर्गः ६४ सर्गः १२८

त्रयोविंशः सर्गः २३

श्रीवसिष्ठ उवाच ।

अथासौ वायसश्रेष्ठो जिज्ञासार्थमिदं मया ।

भूयः पृष्टो महाबाहो कल्पवृक्षलताग्रके ।। १

चरतां जगतः कोशे व्यवहारवतामपि ।

कथं विहगराजेन्द्र देहं मृत्युर्न बाधते ।। २

भुशुण्ड उवाच ।

जानन्नपि हि सर्वज्ञ ब्रह्मञ्जिज्ञासयेव माम् ।

पृच्छसि प्रभवो नित्यं भृत्यं वाचालयन्ति हि ।। ३

तथापि यत्पृच्छसि मां तत्ते प्रकथयाम्यहम् ।

आज्ञाचरणमेवाहुर्मुख्यमाराधनं सताम् ।। ४

दोषमुक्ताफलप्रोता वासनातन्तुसंततिः ।

हृदि न ग्रथिता यस्य मृत्युस्तं न जिघांसति ।। ५

निःश्वासवृक्षक्रकचाः सर्वदेहलताघुणाः ।

आधयो यं न भिन्दन्ति मृत्युस्तं न जिघांसति ।। ६

शरीरतरुसर्पौघाश्चिन्तार्पितशिरःफणाः ।

आशा यं न दहन्त्यन्तर्मृत्युस्तं न जिघांसति ।। ७

रागद्वेषविषापूरः स्वमनोबिलमन्दिरः ।

लोभव्यालो न भुङ्क्ते यं मृत्युस्तं न जिघांसति ।। ८

पीताशेषविवेकाम्बुः शरीराम्भोधिवाडवः ।

न निर्दहति यं कोपस्तं मृत्युर्न जिघांसति ।। ९

यन्त्रं तिलानां कठिनं राशिमुग्रमिवाकुलम् ।

यं पीडयति नानङ्गस्तं मृत्युर्न जिघांसति ।। 6.1.23.१०

एकस्मिन्निर्मले येन पदे परमपावने ।

संश्रिता चित्तविश्रान्तिस्तं मृत्युर्न जिघांसति ।। ११

वपुःखण्डाभिपतितं शाखामृगमिवोदितम् ।

न चञ्चलं मनो यस्य तं मृत्युर्न जिघांसति ।। १२

एते ब्रह्मन्महादोषाः संसारव्याधिहेतवः ।

मनागपि न लुम्पन्ति चित्तमेकं समाहितम् ।। १३

आधिव्याधिसमुत्थानि चलितानि महाभ्रमैः ।

न विलुम्पन्ति दुःखानि चित्तमेकं समाहितम् ।। १४

नास्तमेति न चोदेति न संस्मृतिर्न विस्मृतिः ।

न सुप्तं न च जाग्रत्स्याच्चित्तं यस्य समाहितम् ।। १५

अन्धीकृतहृदाकाशाः कामकोपविकारजाः ।

चिन्ता न परिहिंसन्ति चित्तं यस्य समाहितम् ।। १६

न ददाति न चादत्ते न जहाति न याचते ।

कुर्वदेव च कार्याणि चित्तं यस्य समाहितम् ।। १७

ये दुरर्था दुरारम्भा दुर्गुणा दुरुदाहृताः ।

दुष्क्रमास्ते न कृन्तन्ति चित्तं यस्य समाहितम् ।।१८

आभान्ति विपुलार्थानि महान्ति गुणवन्ति च ।

सर्वाण्येवानुधावन्ति चित्तं यस्य समाहितम् ।। १९

यदुदर्कहितं सत्यमनपायि गतभ्रमम् ।

दुरीहितदृशोन्मुक्तं तत्परं कारयेन्मनः ।। 6.1.23.२०

यददृष्टमशुद्धेन चित्तवैधुर्यदायिना ।

अनेकत्वपिशाचेन तत्परं कारयेन्मनः ।। २१

आदौ मध्ये तथान्ते च चिराय परमोचितम् ।

यच्चारु मधुरं पथ्यं तत्परं कारयेन्मनः ।। २२

यदनन्तं मनःपथ्यं तथ्यमाद्यन्तमध्यगम् ।

समस्तसाधुभिर्जुष्टं तत्परं कारयेन्मनः ।। २३

यद्बुद्धेः परमालोकमाद्यं यदमृतं परम् ।

यदनुत्तमसौभाग्यं तत्परं कारयेन्मनः ।। २४

सामरासुरगन्धर्वे सविद्याधरकिन्नरे ।

ससुरस्त्रीगणे स्वर्गे न किंचित्सुस्थिरं शुभम् ।। २५

सतरौ सनराधीशे सपर्वतपुरव्रजे ।

साम्बुधौ भूतले तात न किंचिच्छोभनं स्थिरम् ।। २६

सनागे सासुरव्यूहे सासुरस्त्रीगणे तथा ।

समस्त एव पाताले न किंचिच्छोभनं स्थिरम् ।। २७

सस्वर्गे ससुरालोके सपाताले सदिक्तटे ।

जगत्यस्मिंस्तु सर्वस्मिन्न किंचिच्छोभनं स्थिरम् ।। २८

आधिव्याधिविलोलासु दुःखौघवलितासु च ।

क्रियासुनित्यतुच्छासु न किंचित्सुस्थिरं शुभम् ।। २९

तरलीकृतचित्तासु हृदयानन्दिनीषु च ।

चिन्तासु धीविकारासु नकिंचित्सुस्थिरं शुभम् ।।6.1.23.३०

हृत्क्षीरोदकसंस्पन्दमन्दरेषु चलेष्वपि ।

स्वसंकल्पविकल्पेषु न किंचित्सुस्थिरं शुभम् ।। ३१

अनारतागमापायपरास्वसिशिरास्वपि ।

चित्राकारासु चेष्टासु न किंचित्सुस्थिरं शुभम्।। ३२

न वरमेकमहीतलराजता

न च वरं विबुधामररूपता ।

न च वरं धरणीतलनागता

स्थितिमुपैति हि यत्र सतां मनः ।। ३३

न वरमाकुलशास्त्रविचारणं

न च वरं परकार्यविवेचनम् ।

न वरमग्र्यकथाक्रमवर्णनं

स्थितिमुपैति हि यत्र सतां मनः ।। ३४

न वरमाधिमयं चिरजीवितं

न च वरं मरणं दृढमूढता ।

न च वरं नरको न च विष्टपं

स्थितिमुपैति हि न क्वचिदाशयः ।। ३५

इति विविधजगत्क्रमाः समस्ताः

खलु मतिमूढतया नरस्य रम्याः ।

चलतरकलनाहिते पदार्थे

कथमुपयान्ति चिरस्थितिं महान्तः ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० निर्वाण० पू० भुशुंडो० समाधानसंकल्पनिराकरणं नाम त्रयोविंशः सर्गः ।। २३ ।।